M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Rel. / Ser. ४७७

Title: Adhana Prayoga

777

आधान प्रयोगः

Ādhāna Prayoga			Title
			Author
			Editor
			Year, Vols.
			Publisher
777			Remarks

श्रीगणेशाय नमः। फलमतउपपत्तेरिति नयतो यो शेषकर्मफलदा
ता। नमहं सकलसुराणां परमंप्रणमामि यज्ञनामानं ॥१॥ अथाधा
नप्रयोगः। तत्र कल्पसारः। आधित्सुरग्नीन्पुरतो विशुद्धः शिष्टान
नुज्ञाप्य तथोत्तमर्णान्। कृच्छ्रादिशुद्धः कृतचौलसंज्ञो यो मेखली व्रज
त्यग्निभिरा कुमारं॥ शुद्धोपि कृच्छ्रमांडगणान्कृती क्रमात्कुर्यादि
ति॥ आपस्तंबः॥ द्विभार्यो नैकया सार्द्धमादधीत कृताशनान्। असं
स्कृतसवर्णाग्निमसवर्णां विहाय च॥ कात्यायनः॥ सवर्णां व्यतीतामा पा२
मसवर्णा यदा भवेत्। इष्टौ तामसवर्णामाधानं विदध्यात्तान्यथा क्वचित्।

र्दक्षीये जैमिनिः। अनाचारां पापरोगीं हीनांगीं कुलदूषिकां। सवर्णाम
सवर्णां वा विहायाधानमाचरेत्। जातपुत्रोऽजातपुत्रो वा कूश्मांडगण
होमाभ्यां गृह्यवह्निना आत्मानं पावयित्वा सपत्नीक आदधीत बहुपत्नी
कश्च सर्वाभिः सहैवादधीतेति तच्च कृत्। तथा कर्माणि एकैकां सन्नह्य
त्येकैकां सन्नह्यत्येकैकां गार्हपत्यमीक्षयत्येकैका माज्यमवेक्षयतीति व
चनात् सर्वाभिः सहैवाधिकारः प्रतीयते। रुद्रैकादशिनी त्रिरात्रोपवा
सावपि शुध्यर्थं पूर्वं कार्यौ विनिदेवः। कृत्तिकारोहिणीमृगशीर्षपूर्वोत्त
राविशाखोत्तरापूर्वाभाद्रपदानक्षत्राणामन्यतमे पर्वणि वसंते ब्राह्मण
आदधीतेत्याश्वलायनः। पुनर्वसुचित्रानक्षत्रे अप्याह बोधायनः। श्रव

2 णमघानुराधाश्चप्याहापस्तंबः। वसंतेब्राह्मणःमासद्वयात्मकऋतुरितिसिद्
धः। वसंतस्यसौरश्चांद्रश्चेतिद्वैविध्यात्सौरस्यापिमीनमेषयोर्मेषवृषयोर्व
भावेतिद्वैविध्यात्फाल्गुनेसवितुर्मीनराशावनुभूवेद्वौकार्यमाधान
मितितन्नहृत्। यद्यप्यन्नक्षत्रपर्वयोगोवसंतेनलभ्यतेततःपर्वपरित्य
ज्यकेवलंनक्षत्रंग्राह्यमितिसिद्धांतभाष्यकारैःकृतौ।नृसिंहः।ऽक्षन
क्षत्रसंबंधंयद्यपिपर्वनलभ्यते।तदोत्कमेषकुंभयोर्देकस्मिन्नादधीत
मेष्टीति।देवजानस्तुप्रथममेवसद्योक्तंमन्यते।तंचकृत्ताचतुर्योरोहिण्या
मग्निमित्यादिबौधायनीयसूत्रमनुस्तस्येसमवादि।मुख्यस्वांद्रवैशा
खामावास्यारोहिणीयुक्तःकालः।तदभावेरोहिणीयुक्तपर्वांतरमपि 2

रोहिणीयुक्तयजनीयतिथियोगेवा।तदभावेकेवलारोहिणी।तदभावेनक्ष
त्रांतराणि।तत्रापिऋतुनक्षत्रपर्वयोगःप्रधानं।तदभावेपूर्वपक्षएवऋतु
नक्षत्रयोगोग्राह्यः।ऋतुपर्वणोर्योगोवेति।देवस्तुरायनेपूर्वपक्षेरो
हिण्यां।तच्चैवनक्षत्रांतरेवापौर्णमास्यममावास्ययोर्वादधीतेत्याह।दाक्षि
णायनेऽपिविहितमित्याहकेशवः।हरदत्तस्तुरोहिण्याःमुख्ययोरःफाल्गु
न्योराधानमाहुःशास्त्रमित्युक्त्वाग्निचयाधानकालेवैशाखामाप्रा
पदन्यतररोहिणीयोगसंपत्तिमहहेरिघ्वं।अग्निचयाधानेयोगासंभ
वेआहवनीयाधानेयोगआवश्यकइत्युक्ता।शौनकस्तुवसंतेजनहरःव
संतेकृत्तिकारोहिण्याःसंयोगेयजनीयेवाहनिवढ्ढीनादधीतोत्तमंवानो

तमतिवर्तयेदिति॰ उक्तंतुविनापिनक्षत्रेंआधानंकार्यंनक्षत्रंविनापिऋ
तौपर्वणिकार्यमित्यप्याह॰ नक्षत्रेकेवलेवापिऋतौवाकेवलेऽप्यवेलः॰ आ
धानपर्वसंपत्तौविपर्वणिन्ववापुनरित्यापस्तंबोक्तेः। आर्ताधानेतुनर्तु
त्वे॰ नियमः। पर्वनक्षत्रनियमस्त्वेष्वेवेतिवृत्तिकृत्तदेवत्रातो सोऽपिनेतितत्रकृत्
हरदत्तीये॰ यदार्तेःश्रद्धाकुंश्चक्रंवतितदादक्षिणायनेउक्तनक्षत्रेपर्वणिद
क्षिणायनंप्रोह्वाविभज्यवसंतादितत्तदंशेतैस्तैःकर्तव्यं॰ शिशिरःसार्व
वर्णिकइत्येकःपक्षः। दक्षिणायनेउक्तनक्षत्रइत्येकःदक्षिणायनेपर्व
स्य णीत्येकेइति। शिशिरस्यसार्ववर्णिकत्वमाहवसिष्ठः॥ आदधीतानलंवि
प्रोवसंतग्रीष्मयोरपि॰ ग्रीष्मेवर्षाःस्वपिक्ष्मापः शिशिरःसार्ववर्णिक ३

इति॰ यद्यप्यत्राविशेषेणग्रीष्मवर्षास्तथाप्याषाढंविहायतत्रविशेषणाधानंका
र्यं॰ आदधीतानलान्विप्रोनाषाढेमासिकर्हिचित्॰ भाद्रेमासिनराजन्योनाश्वि
नेशूद्रजः॰ क्वचित्इतिकात्यायनोक्तेः। आपस्तंबस्तु॰ माघादिपंचमासेषुत्रि
वर्णाधानमिष्यते॰ केवलेफाल्गुनवास्याद्वारंभोवीतरायणामितिनेयुका
रिकायांतु॰ माघादिपंचमासेषुश्रावणेवाश्विनेतथा। मार्गशीर्षेशुक्लपक्षे
आधानमथकारयेदिति॰ स्मार्तेविवाहंप्रकृत्यबौधायनसूत्रं॰ यथाश्रद्धम
तऊर्ध्वंजीवतिपितर्यग्नीनादधीतेतिबौधायनोजीवतिमृतेवाजायामवा
प्यदशमेहनीशालीकिनंतुब्राह्मणोभवतीति॰ यत्तुकर्मांति॰ काम्युक्तान्य
न्याधेयानिभवंतिकृत्तिकास्वग्निमादधीतरोहिण्यांपुनर्वस्वोरिष्युपत्र

म्पसद्यस्कालान्येतानिभवंतीति· तत्काम्याधानविषयं· अतएवभवत्त्वा
न्यांह· रोहिण्यामग्निमादधीतेत्यत्रेवेशिवनित्यत्वव्यापनार्थं इतरे
षामपितुकामसृष्टानीतिवचनादनित्यतेति· आर्त्ताधानेपि सद्यस्काल
त्वंकर्मातएवोक्तं· अथातआर्तियान्यग्न्याधेयानिव्याख्यास्यामोविप
क्षआपूर्यमाणपक्षआदधानोयावानवकाशास्यात्तदहर्विदधीतपौर्ण
मास्यांसद्यस्कालमित्यादिना· उक्तकालआधिक्युमेकमासगुरुशुक्रा
स्तबाल्यवार्धकास्तकाकान्परिहरेत्· अग्न्याधेयादिकर्माणिप्रकृत्य·
बाढिवायदिवाक्रुद्धेशुक्रेबाल्यमुपागते· मलमासइवैतानिवर्जयेदि ४
त्यादिनिषेधात्· तत्रगुरुशुक्रयोर्बाल्यवार्धककालपरिमाणमुक्तं

मुहूर्ततत्वे· प्राक्पश्चादुदुक्तबाल्येत्रिदिनदशादिनंपक्षोर्द्धत्र्यंशवार्धंतेद्वेप
पक्षंगुरोर्द्वेदशादिनभृगुजयोर्बाल्यहंकेपिनेष्टमिति· ज्योतिर्निबंधेमांडव्यः॥
त्यजेद्दशाहंशिशुवृद्धयोश्चसितेज्ययोश्चेतिवदंतिगार्ग्याः। कालांशतुल्या
निदिनानिकेचित्सप्ताहमन्येत्वपरेत्रिरात्रमितिसंहिताप्रदीपे· स्यात्सप्तरा
त्रंगुरुशुक्रयोश्चबालत्वमहानिदशाकंचवार्धं· वृद्धौसितेज्यावभुकौशिशु
त्वेशास्तौयतस्तावुपनीयमानाविति· विशेषोमतांतेपिद्रष्टव्यः॥ कश्चिद्दिशे
षोज्योतिःशास्त्रे· अग्न्याधेयंदारकर्मविधेयंकेचित्प्राहुःकृत्तिकादायादका
ले· शाकाग्न्यादीयादर्भेप्राक्तनेकृत्तिकायांसौम्येब्राह्म्येपुष्यपौष्णेभ
राषु· भकारान्योर्भविशाखाः· शाक्रंतज्येष्ठाः· सौम्यंमृगः· ब्राह्मंरोहिणी·

वौलंरेवतीतिस्रःउत्तराः कर्किनक्रघटमीनविलग्नेष्वाधाकेत[illegible]ानुगतेथदीवं
लग्नगेकुमुदिनीदयितेवानाश[illegible]मेषजनितोपिकृताग्निः॥२ ।कर्किःकर्कः।
नक्रोमकरः।घटःकुंभः।एषुलग्नेषुवातदीयंशकेकर्कादिलग्नानामेवां
शकेनवमांशेतनुगतेसतिलग्नगतेसतिवाकुमुदिनीदयितेचंद्रेलग्न
गतेस्मिन्योगत्रयेजनितोपिकृताग्निःअवश्यनाशमेति॥२॥ अथल
ग्नस्यशुभावस्थानाह केंद्रेस्थेपचयत्रिकोणलग्नगताःसूर्यादिजीवेंदवो
वाशुभोपचय३।६।१०।११।स्थितायदितदाग्न्याधानमुक्तंशुभं चेंद्रेने
धनगेम्रियेतयुवतिर्भौमेपुमानष्टमेशौर्येमृत्युगतेरुजान्वसहितो
ग्न्याधानकर्ताभवेत्॥३ केंद्राणिलग्नंचतुर्थंतथालग्नात्सप्तमंद ५

शमंचएतानिचत्वारिउपचयस्थानानि लग्नात्तृतीयषष्ठदशमैकादशानित्रि
कोणेलग्नान्नवमंपंचमंचएषुस्थानेषुसूर्यः।आरोभौमः।जीवोगुरुः।इंदु
श्चंद्रः।एतेग्रहाश्चेत्स्थिताःशेषाःबुधशुक्रशनयःउपचयस्थानेषु३।६।१०।११।
वर्तमानाःयदातदाग्न्याधानंशुभमुक्तं अनिष्टानाह चंद्रेनैधनगेष्टमस्थे
युवतिःम्रियेतभौमेमंगलेऽष्टमेपुमान्म्रियेत शौर्येचंद्रभौमरहितेःलग्ना
दष्टमस्थेःअग्न्याधानकर्तारुजासहितःव्याधितोभवेत्॥३ पुनर्वर्ज्यांत
रमाह नोकुर्याच्छ्रुतपुरुकपाणिग्रहा[illegible]क्ष्मापुत्रजीवेंदुभिर्नीचस्थैर्विजि
तैश्चिपाभवनेगैरस्तंगतैर्वाजितैः॥ चापस्थेतनुगेगुरौक्रियगतेसप्तां
बरस्थेकुजेशीतांशौत्रिपअयगोदिनकरेवास्यान्नहादीक्षितः॥४॥

क्ष्मापुत्रो भौमः। जीवो गुरुः। इंदुश्चंद्रः एतैर्नीचस्थैर्भौमस्य कर्कटे नीचं गु
रोर्नीचं मकरः। इंदोः वृश्चिकः एषु नीचस्थेषु स्थितैः विजितैर्वा ग्रहयो
गे जाते य उत्तरस्थः। उत्तरदिक्स्थः स जयी यो दक्षिणस्थः स विजयी। एत
द्व्यपराजयलक्षणं· अन्यत्र द्रष्टव्यं· तत्र भौमादिपंचानामेव भवति। तथारि
पुभवनगते· भौमस्य रिपुः बुधः तद्गृहे मिथुनकन्ये तत्रस्थे भौमे· तथा गु
रोः शत्रू बुधशुक्रौ· तद्गृहाणि मिथुनकन्यातुलवृषाख्यानि· अस्मि
न्तु तृतीये गुरुः स्थितः शत्रुगृहो भवति· तथा चंद्रस्य शत्रुर्नास्त्येव। अ
स्तंगतैः साक्षिः अंतभुक्तपादिग्रहं नैव कुर्यात्॥ अन्यच्च अयोगांतरं धनु
स्थे गुरुलग्नतो गुरुसहिते धनुर्लग्ने इत्यर्थः वाक्रियगते मेषस्थे मं ६

गले लग्नात्सप्तमस्थे। अवरं दशमं तत्रस्थे वा चंद्रे त्रिषडायगे लग्नात्
त्रि ६।११। सूर्ये वा स्थिते तदिति सर्वत्र संबध्यते तदावश्यं आधानकर्ता दी
क्षितो भवेत्॥ ॥इत्याधानकालः॥ ॥अथ विहारः॥ इष्टदेशे प्रत्यग्दक्षि
णोन्नते प्रागुदक्प्रवणे दीर्घचतुरस्रं समचतुरस्रं वा अगारं प्राच्यां दक्षि
णस्यां द्वारद्वययुक्तं कृत्वा तत्र विहारं कुर्यात्· तथा वै दक्षिणः पाणिरिति
सूत्रे तथैव केशवोक्तेः। मध्येगारस्य चतुर्विंशत्यंगुलविष्कंभं गार्हपत्यायत
नं कर्तृतदर्धेन वृत्तमवनमयेदिति देवः। सप्तानां विंशतिमंगुलानां विष्कंभ
मार्गमिलये पराश्वैः। मध्यस्थशंकुस्थितया अर्धरज्ज्वा विलिख्यतां मंडलम
प्रसव्यमिति तु कल्पसारः। तं च कदव्येव· गार्हपत्यमध्यदेशादारभ्य द्वाद

आप्र

×राहवनीयपश्चिमशंकोः२

१ शप्रक्रमे द्वादशपदे वा प्रक्रमाष्टके पदाष्टके वाहवनीये देशा इति सः। द्विरश्च्यु
गार्हपत्यपूर्वशंकोश्चैतदंतरं गार्हपत्याहवनीयमध्ययोर्वेलायां तयोर्वान
क्रमाद्वा एतावद्द्वादशविक्रामपरिमितं भविष्यतीति निश्चित्य वेदिमानं
कुर्यादिति हरदत्तः। एषामन्यतमाया मानरज्जुं पंचधा षोढा वा संभुज्य प
षं सप्तमं वा भागमागंतुकं संयोज्योभयतः पाशौ कृत्वा पुनः पंचधा संभु
र्ण ज्यापरांताद्भागाद्वयेतीति लक्ष्म कृत्वा शंकोः पाशौ प्रतिमुच्य लक्ष्मणा द
क्षिणीकृत्य शंकुं निहन्यात्। एवमुत्तरत आर्जवाय दक्षिणशंकोरुदक्
द्वादशांगुलाधिकांगुलद्वये शंकुं निहत्येति कहूयाधिकपदमात्रं
रज्जुमुभयतः पाशां कृत्वा तस्मिन्पाशं प्रतिमुच्य मंडलं लिखेत्। मं १

डलोत्तररेखायां शंकोरुञसा शंकुं निहत्य तत्र पाशं प्रतिमुच्य पूर्ववन्मंडलां
तरं कृत्वा मंडलसंनिधौ यन्योत्तरपार्श्वमुत्सृज्य दक्षिणपार्श्वे दक्षिणायाम
पतनं कुर्यात्। स्थानाद्दक्षांकुमशीतिलिप्तिकैर्मितेन निहत्य प्रतिबध्यदा
मवीर्धतिलाभ्यां चपाहायसंततो विलिख्यता तेन वक्रेन मंडलां तथोत्तर=
स्मात्परिधेस्तु मध्यादारभ्य संवर्त्यैव वर्तुलं तत्। संधौ विभज्य हेयमुभरांशं ८
त्यजेत्परो दक्षिणवक्रदेशः। पूर्वीरवरात्पश्चिमरेखेतो थवेदिरज्जुप्रमाणा
मथवदपरां चेति कल्पसारः। द्वादशांगुलाधिकचतुर्विंशत्यंगुलिविष्कंभो
दक्षिणाग्निस्तस्य चतुर्भागे मध्यशंकोरुत्तरायतिशंकुं निहत्य तत्र विष्कंभा
र्धेन मंडलं कृत्वा तत्र प्राचीस्पंघानियम्योत्तरमर्धं परित्यज्येद्दक्षिणं दक्षिणा
त यनं कुर्यादिति देवः॥ आहवनीयमध्यशंकोः पश्चात्तु रत्नाच्च प्रादेशे शंकुं

निहत्याग्निक्षेत्रायामं उभयतः पाशौ कृत्वा पाशादारभ्य द्वादशांगुले
ऽष्टादशांगुले च लक्षणं कृत्वाऽऽहवनीयपूर्वापरयोः शंक्वोः पाशौ निधाय द्वि
तीयलक्षणं दक्षिणत उत्तरतश्चाकृष्य प्रथमे लक्षणे शंकुं निहत्य पाशौ व्य
त्यस्य पूर्ववच्छंकुं निहन्यात्· नवतिशताधिकैकविंशत्यंगुलप्रमाणमाहवनी
यमिति देवः॥ अथ चतुरस्रमाहवनीयायतनं आहवनीयापरशंकोः षण्ण
वत्यंगुले शंकुः। षण्णवत्यंगुलां मध्यमार्थीं कृत्वा प्रमाणांते प्राच्यर्थे चिह्नं कृ
त्वा चत्वारिंशदंगुले न्यंछनार्थं चिह्नं करोति· द्वात्रिंशदंगुले श्रोण्यर्थं चतु
र्विंशत्यंगुले अंसार्थं· न्यंछनेन दक्षिणतश्चोत्तरतश्च रज्जुमुपायम्य श्रो
ण्यंसान्कुर्यात्· द्विगुणां पार्श्वमानीं मध्यचिह्नवतीं कृत्वा दक्षिणश्रोण्यं
सयोः पाशौ प्रतिमुच्य लक्षणं दक्षिणत आकृष्य म[illegible]कुं निहत्य तत्र

पाशौ प्रतिमुच्य लक्षणेन श्रोणिप्रभृति आ सासां परिलिखेत्· एवमुत्तरपूर्वापरपार्श्वान् विपरि
लिखेत्· यदि भूमिरणुस्ता स्यादसुर्देशधाकृता· वर्धयेत् तानुद्धृत्य यो दृश्यात तया वा
न वहिः क्रियेति गोपालः॥ कुंडेषु च प्रथमा मेखला षडंगुलोत्सेधा षडंगुलायामा कार्या·
द्वितीया षडंगुलोत्सेधा चतुरंगुलायामा कार्येति· वेद्यामासाद्यमेखला चतुरंगुलायामोत्सेधा
कार्या· द्वितीया द्व्यंगुलायामोत्सेधेति॥ ॥इति विहारः॥ ॥अथ पात्राणि॥ वैधे· सहस्राहे
वैध्यापनस्तके आसेचनानि कारयेदथतः पुष्कराण्येव कौस्त्रं प्राचीनपुष्कराः स्रुवः सन्नो
भवंति स्रुवां प्रमाण इति बाहुमात्रा इति बौधायनः॥ अरत्निमात्रा इति शालीकिः प्रादेशमा
त्रा इत्यपि। स्रुवामात्रेति विकान इति हस्त्योव्यः स्युरिति बौधायनः वायसपुच्छा इति शा०
हंसमुखसेचना इत्यापस्तंब इति शेषं यज्ञतंत्रे द्रष्टव्यं॥ ॥अथारण्याहरणं॥ ॥आधाना
२ त्पूर्वं ग्रीष्मे शिशिरे हेमंते वा पूर्वेद्युः कृतमंगलः पुण्याहं वाचयित्वा ग्रामाद्बहिः प्राचीमुदीचीं वाग
त्वा शमीगर्भमश्वत्थं शमीगर्भं वा चतुरंगुलमुत्सेधां द्वादशांगुलविस्तीर्णां षोडशांगुलमा

१ यतां अपि वा प्रादेशमात्रो सर्वतः समा चतुरंगुळमुत्सेधां कृत्वा तस्या उत्तानाया अनुलोममधस्ता
त्प्रत्यक्प्राणवं प्रजननं कुर्वीत । तावतीमेवोत्तरारणिं । शम्याः परिहृतो अश्वत्थ अपरिहृतो वा तान
स्य विकारा वेत्ता विति भवः । हरदत्तीये जैमिनिः । शमीकोटरजो अश्वत्थः शमीगर्भो निगद्यते श ग
म्या संलग्नकमूलो वा शमीछायागतोपि वेति । त्रिकांडमंडनः । हेमंते वा शरत्काळे शुक्लपक्षे शु
भे दिने ५ नांदीश्राद्धं पतिः शुद्धः कृत्वा पुण्याहवाचनं । अध्वर्युसहितो गत्वा शुक्लस्रग्वस्त्रभूष
णः पुनः श्वेतां कुराश्वत्थादाहरेदरणीद्वयमिति चतुर्विंशत्यंगुळायामे अष्टांगुळविस्तारे च
तुरंगुळोत्सेधे अरणी कार्ये इत्यपि देवः । अधरारणेः पश्चिमांते प्रत्यक्प्रणवं गर्तं कुर्यादिति सः
उत्तरारणेः सकाशात् प्रत्यक् निम्नं प्रजननं कुर्यात् । अरण्योरुत्तराधरभावो विदारित
दक्षस्कंधोत्तरभागनिबंधनः ॥ अविहारितेयथेष्टं । उत्तरारण्यवसाने त्वधरारण्याए
व प्राजननं कुर्यादिति मंत्रकृत् । अरण्याहरणकाल एव यज्ञपात्राण्यपि संभरेदिति हरदत्तो
देवश्च । कल्पसारेपि । अरण्याहरणसाकं सर्वयज्ञियकं तु मिश्रिते । अध्वर्युणाकाल एव १

तं नेह नामीति मंत्रेणारण्याहरणे क्रियमाणे यजमानः यो अश्वत्थः ० तं त्वेति मंत्रेणारणी आह
रेत् । तथैव हरिदिनकृत्के । पुत्रकापरपर्यायं प्रजननमष्टांगुळं । खादिरो द्वादशांगुळो मथ्योपमं
थनाविति वृद्धाः । इदं च बहिः प्रयोगमरण्याहरणं कृत्वा कर्शिष्यन्वा संभारोपकल्पनं कुर्या
त् । तथाह हरदत्तः संभारानुद्दिश्य तेषां संभरणमनुत्काराणि पात्रसंभरणकथनं तानि संभृत्य स
संभाराहरणपश्चाद्दपि कर्तुं शक्यमिति द्योतनार्थमिति ॥ ॥अथ संभाराः॥ ॥बोधायनः॥
स उपकल्पयते उषांश्च सिकतांश्चाखूत्करं च वल्मीकवपां च सूदं च वराहविहतं च पुष्कर
पर्णं च शर्कराश्चेध्यपेश्चो पार्थिवाः । अथ वानस्पत्याः । अश्वत्थश्चौदुंबरश्च पर्णश्च शमी च वि
कंकतश्चाशनिहतश्च शमीगर्भा चारणी मुंजकुलायं त्रिवियस्त्वाश्वत्थस्य तिस्रः समिध
आर्द्राः सपलाशाः सप्रारोहाः प्रादेशमात्रा अप्रतिशुष्काः बहूहिरण्यशकलं स्त्री न्सोव
र्णी स्त्रीन्राजतं त्रिवृच्चं पूर्ववाहं रथचक्रं ब्रह्मौदनिकान्व्रीहीन् सर्वौषधं रोहितं चर्मानिहं ३१
नवानि यज्ञपात्राणीति । यद्यपि संभरणमत्र क्रमाद्सिकताश्चोपाश्चेति वाच्यं तथापि
पूर्वमप्युषाणां संभरणमस्तीति सूचनार्थमादावुषग्रहणं । तथाह हरदत्तीये आपस्त

बः। नाग्निमग्रे संभरेद्धाङ्काः प्रजाः स्युः पुष्टिमेवाग्रे संभरतीत्येकमिति।
१० अग्निं सिकताः। वैश्वानरस्य रूपमिति मंत्रात्। पुष्टिरूपाः। पुष्टिर्वा ए
षा प्रजननं यदूषा इति श्रुतेः। आखूनामुत्करः सम्भृत्यो यत्र पांसो न तत्वा
तदित्यर्थः। वपाविद्धं तन्मृत्। सूद इदकं यस्मिन्स्तन्मृत्। कमलपत्रस्य पा
र्थिवेषु गणनं अवानस्पत्यत्वात् पर्णं पृथिव्याः प्रथनमिति मंत्राच्च।
अष्टौ पार्थिवा इति पृथक्करणेन पार्थिववानस्पत्यस्पर्शं तैराके मंत्रक्र
मप्राप्तेनुत्राकल्लस्य तैर्नव्यवधानं सूच्यते। मंत्रक्रमेण। यानि यज्ञि
यसमिधो मुंजकुलायमरण्याविति वक्ष्यत्यत्ययोक्तिरराणिसमि
संभरणे विकल्पसूचनाय। तथा च भवः। पुरस्तात् द्वाभिधामरणी १०

संभरतीत्येक इति स्वसन्नयासाधकत्वस्यारण्यो। मुंजकुलाये च तुल्यत्वात् संभा
रांतराणां स्वनाशेन साधकत्वादरण्यं ते तान्निर्दिष्टाः। संभरणं तु मुंजकुला
यस्यैव पूर्वं सूचितं। अरण्योर्मंथनरव्यकार्ये विनियोगहेतुत्वात्। विनियो
जकसंभरणानां तेष विनियोज्यसंभरणस्याश्रितत्वात्। त्रीस्त्रीनित्येव
षट्त्वे सिद्धे पुनः षडुक्तिः सकृन्मंत्रप्राप्त्यर्थं। यज्ञियसमिद्दितरा अ
पि आर्द्रत्वादिगुणयुक्ता ग्राह्याः। अथवा यथालाभमुभयो वीत्यवादि सं
भरणस्तृत्वे। कर्मान्ते। उर्वोश्चसिकताश्चोभियेभस्म राड्वो यः स्युस्तानु
हृत्यदारण्यस्य वराहस्य विहताद्दाहारयेद्दारण्यास्यारखूत्करादाहारये
घोनुपदास्सीस्तदस्य। न दाहारयेत्तत्देविद्यमानेकृष्णी स्वसुपिरादाहा

स्येदर्शानिहतेऽविद्यमानेशीतहतमाहारस्ये द्वालहतं वेति। कुळीरः कर्कटः
हैधेः। अत्रो० बौ० नाशानिहतं कुवरतघोरस्वरूपामिति कुवरते वाशानिह
तं न तु मुंजकुलायं नह्येतस्यानुरव्याविद्यत इति भा० इति मुंजकुला
याभावपक्षे मुंजस्तंबं मुंजपुष्पशीर्णपर्णचितिके त्रावः। सर्वौषधमाह
कल्पसारः। तिलाश्च माषांश्च यवाप्रियंगून् व्रीहीन् अणून्सामु मिकान्
कुळित्थान्। गोधूमकान्वाप्रवदंति सप्तग्राम्यानिमानोषधिराब्रवा
न्यान्। श्यामाकनीवारगवीधुकांश्च सजर्तिलान्गार्मुतवांस्कवेणून्।
स्तानेतु वेणोः कुरुविंदकान्वा वदंति चारण्यभवांश्च सप्तेति। तथा स्मृ
त्यानुक्तानप्येतानुकल्पयते। वासिष्ठवैश्वामित्रांगिरसायास्यान्ब्रह्म ११

होत्राध्वर्युउद्गातॄन् आग्नीध्रं च योनिवृत्ता द्विपुलसंपन्नान्वा अनियतगो
त्रान्वोद्गात्राविना चतुर एवर्त्विजो वा। ऋत्विक्समसंख्यान् विष्टराः पाद्या
र्घ्याचमनीयमधुपर्कपात्राणि दधि मधुनी सप्त सोत्तरीयवासांसि
लेख्यं। आसनीयं चर्मौमेव समित्कुशांश्चीन् धारावान् षडुदकुंभानेकोन
पंचाशद्ध्वान्वैदीर्घ कारेस्कोपबर्हिणो औदुंबरीं दर्वी तिस्त्रातिस्त्रोभ्रष्टादि
समिधो दूर्वागंधपुष्पफलानि सूत्रं यवानिति संभाराः॥ अथ प्रयोगः॥
आधानपूर्वदिनात्पूर्वेद्युः शाखोपुण्याहं वाचयित्वा श्वोभूते नांदीश्राद्धं कु
र्यात्। तं च कर्कोक्तेः। तच्चापराह्णे। पार्वणं चापराह्णे स्यान्नांदीश्राद्धं त

12 थाग्निकमितिनिर्णयामृतोक्तेः। रक्षस्तु विश्वेदेवौ। कर्मांगश्राद्धे तयोरे
वविहितत्वात्। रात्राबुदकशांतिं प्रतिसरबंधं च कुर्यात्। तदर्थं स्थंडिलं
प्रथमुच्यते स्मार्तसूत्रे। अथ स्थंडिलविधिं व्याख्यास्यामो भस्मकेशा
द्यसुक्ता अनार्द्राः सिकताश्चतुरंगुलं प्राचीनमुच्छ्रित्य पंचांगुलिप्रमा
णं पश्चिमत ऊर्ध्वांगुलिविशेषं दक्षिणत ऊर्ध्वांगुलिविहीनमुत्तरतः
पंचप्रस्थ सिकताः शुच्यः शुक्लाश्चनार्द्राः अरत्निमात्रं चतुरस्रं प्राक्
प्रवणं स्थंडिलं करोति न लोष्ठेन न काष्ठेन शर्करैर्न नखैः काष्ठेन वैव्या
धितस्याल्लोष्ठेन कुलनाशनं। शार्करैः पुत्रनाशः स्यान्नखैर्बंधुवि 12

नाशनं करोति स्मास्फ वर्णरजतताम्रैः शकलेन व्रीहिभिः यवैर्वा दर्भैर्न शुष्केन वमहानाम्न्या
वोपसंगृह्य तस्यामध्यतः प्राचीनं संततमृजुमुल्लिखेत् किंदेवत्यं किंमंत्रमिति मध्यमे
ब्रह्मदेवत्यं ब्रह्मजज्ञानमिति दक्षिणतः प्राचीनं संततमृजुमुल्लिखेत् किंदेवत्यं किंमंत्र
मिति यमदेवत्यं नाके सुपर्णमिति तस्योत्तरतः प्राचीनं संततं याऽप्यायस्व समेतु त इति त
स्य मध्यादुदीचीनं सं॰ ति रुद्रदेवत्यं यो रुद्रो अग्नौ इति तस्य पश्चादुदीचीनं सं॰ ति विष्णु
देवत्यमिदं विष्णुर्विचक्रम इति तस्य पुरस्तादुदीचीनं सं॰ तिं इंद्रदेवत्यं इंद्रं विश्वा अवी
वृधन्निति एतदेवमास्थंडिलविधिर्भवति॥ ॥ अथातः परिस्तरणविधिं व्याख्या
स्यामः हरितैरविच्छिन्नाग्रैरविवर्णैरदग्धमूलैर्दर्भैः वस्यत्वा॰ परिस्तृणामीति परिस्ती
र्य दक्षिणेन व्याहृतिभिः पश्चिमेनोद्वयं तमसस्परीत्युत्तरेणाग्न आयाहि वीतय
इति दक्षिणेनाग्निं ब्रह्मायतनं इत्यादि सर्वदर्विहोमानामेष ज्ञानदर्भैर्द्वे हस्तपवित्रे
हे आस्तरण प्रागुदीचीनाग्नेः षोडशैः परिस्तरयां दक्षिणतः प्रागग्रैः सप्तदशैः पश्चादुदी

वीनाग्नेरुत्तरप्रशिरुत्तरतः प्रागग्रैः समस्तदर्भैः पात्राणां पंचसमस्तदर्भैश्च्छादनं प्रणी
तासंबद्धे उपरिष्टाद्दे आज्यपवित्रे द्वे इध्मे अभिद्योतने द्वे दर्भाग्रे द्वे पर्यग्निकरणोल्मुकस्रुमा
र्जनंचतुर्भिरिति॥ अथवैभवतिश्रद्धावाआपः श्रद्धामेवारभ्येतियज्ञोवाआपोयज्ञमेवा
रभ्येतिवज्रोवाआपोवज्रमेवभ्रातृव्येभ्यःप्रहृत्यत्यापोवैरक्षोघ्नीरक्षसामपहत्या
इत्यापोवैदेवानांप्रियंधामेत्यमृतंवाआपस्तस्माद्दीक्षितेनवनीतमद्भिरभिषिंचंतीत्यापो
वैसर्वादेवतादेवताएवारभ्येत्यापोवैशांताःशांताभिरेवास्यशुचंशमयतीतिब्राह्मणंत
स्मात्पवित्रेणशांत्युदकंकरोति॥ ॥विवाहदीक्षोपनयनसमावर्तनाभ्याधेयान्यन्या
निमंगलकार्याणिग्रहोपरागेग्रहोत्पातेचवृद्धिपाकचतुष्पात्क्रमयंविद्धनाथशांतिमा
रभेतयुग्मान्ब्राह्मणान्कृप्रक्षालितपाणिपादानपआचमय्यप्रतिदिशमासनेषू
पवेश्यगोमयेनगोचर्ममात्रंचतुरस्रंस्थंडिलमुपलिप्यदर्भेषुप्राङ्मुखउपविश्यदूर्वा १३
दर्भांश्चधारयमाणःपवित्रपाणिःस्थंडिलंकृत्वाप्रोक्षणसूक्तसत्पर्णमुल्लिख्याद्भिरभ्यु
पू

क्ष्यदूर्वादर्भैर्यवकीर्यगंधोदकेनाभ्युक्ष्यपुष्पैर्यवकीर्यब्रह्मपात्रंनिधायब्रह्मजज्ञानमित्य
थतिरःपवित्रमपआनीयजपतितत्सवितुर्वरेण्यमित्यथवाक्षततंडुलानावपतिभू
र्भुवःस्वरोमित्यथपुष्पैःफलैर्दूर्वैर्यवकीर्यदूर्वादर्भैःपरिछाद्याभिमृशति॥ शंनोदेवीर
भिष्टयइत्यन्वारब्धेषुजपतितत्सवितुर्वरेण्यमित्येतांपच्छोर्धर्चशश्चत्वारः नवीनमु
क्त्वाद्यादीञ्जपतिरक्षोघ्नंकृणुष्वपाजःप्रसितिंनपृथ्वीमित्येतमनुवाकंमंदेवितस्य
र् त्यस्यधर्मणपाक्षयंदैवोविश्वतस्पतीत्येतमनुवाकंयतइंद्रभयामहेस्वस्तिदाविशस्य
तिरितिद्वाभ्यांमहांइंद्रःसजोषाइतिद्वाभ्यांयेदेवाःपुरःसदोग्निनेत्राइतिपंचभिःपर्या
यैरग्नयेरक्षोघ्नइतिपंचाभिरायुष्मानितिपंचहोमुच्योयावामिंद्रावरुणावितस्त्वा
यावामिंद्रावरुणेत्यष्टौअग्नेयश्रास्विनितिचतस्रः॥ नताषाडंनधामेत्येतमनुवाकंन
मोअस्तुसर्पेभ्यइतितिसृभिरदुर्छद्दसंपंचवेअयंपुरोहरिकेशइतिपंचभिःपर्यायैर
प्रतिरथंआशुःशिशानइत्येतमनुवाकंशंनमेमयश्चइत्येतमनुवाकंविहव्याश्च

१४ ममाग्न इत्येतमनुवाकं मा गानस्ते मन्त्र इत्येतमनुवाकं सर्पाहुतीः समीची नामासि
प्राची दिगिति षड्भिः पर्यायैः हेतयो नाम स्थ तेषां वः पुरो गृहा इति षड्भिः ध्रुवा
सुधायेति पंचभिः भव्यं भविष्यदित्येतमनुवाकं अथर्वांगिरस इंद्रो दधीच इत्ये
तमनुवाकं प्रत्यांगिरसं यस्य स्फ्यो हेते इति प्रतिपद्य भ्रातृव्य पादयामसी त्य
तः जातो रक्षातिविश्वमेतदित्यनुवाकं सिंहे व्याघ्र उत या पृदाकावित्येतम
नुवाकं अहमस्मी त्येतमनुवाकं ताम्रर्या चंद्रमसे त्येतमनुवाकं अग्निर्नः पा
तु कृत्व्यास्मं नवोनव इत्येतैस्त्रिभिरनुवाकै रुद्रैरेक पहो मेश्व सुरभिमत्या अ
ब्लिंगाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिः तच्छंयोरावृ
णीमह इत्येतमनुवाकेन नमो ब्रह्मण इति परिधानीयां त्रिरन्वाहेति ब्राह्मणं १४
गणवेनोच्छाप्य व्याहृतिभिः प्रोक्षत्यथ दक्षिणां ददाति पुरस्तादुपविष्टा

य हिरण्यं ददाति दक्षिणतो रजतं पश्चात्कंसं उत्तरतो वासो ददात्यथ गृह
हीतानां च रोगगृहीतानां भूतोपसृष्टानां मित्रबंधुसुहृज्जातिसंबंधि
बांधवानां राज्ञां च राजपुत्रैर्गृहीतानां च बालवृद्धांतर्वत्नीपापरोगिदीर्घरो
गि कुष्ठातुरान्प्रोक्षति हस्त्यश्वोष्ट्रगोमाहिष्यजाविकं भृत्यांश्च धनधान्या
नि च प्रोक्षत्येवमेकरात्रं त्रिरात्रं पंचरात्रं सप्तरात्रं नवरात्रमित्यपमृत्युं ज
यतीत्याह बौधायनः ॥ ॥अथातः प्रतिसरबंधं व्याख्यास्यामो युक्ते
दिने नांदीमुखं कुर्यात्तस्यां रात्र्यां प्रदोषांते प्रतिसरमारभेत शुचौ समे
देशे गोमयेन गोचर्ममात्रं चतुरस्रं स्थंडिलमुपलिप्य युग्मान्ब्राह्मणा

न्प्रक्षालितपाणिपादानाचम्य प्रतिदिशमासने कूपविश्यपश्चात्प्राङ्मुख आचार्यमुप
विशति तस्य दक्षिणबाहुमन्वितरो हस्तमात्रसैकतं स्थंडिलं कृत्वोल्लेखनाद्भिरभ्युक्ष्य स्थंडि
लस्य मध्ये प्रागग्रान्दर्भान्संस्तीर्य तेषूपरि कुंभं निधाय व्याहृतीः शुद्धोदकैः पूरयित्वा द
धिक्षतफलैरवकीर्य गंधपुष्पं धूपदीपैरुदकमभ्यर्च्य कुशैर्दूर्वाभिः प्रतिच्छाद्योत्तरेः शालि
तंडुलस्योपरि प्रतिसरसूत्रं गंधानुलिप्तं निधायाचार्यमुखं स्त्री प्राणायामान्धार
यित्वोदकुंभमन्वारभ्य सावित्रीं जपति तत्सवितुर्वरेण्यमित्येतामथ वेदादीन्जपत्यग्निमी
ळे पुरोहितमित्यृग्वेदस्येषे त्वोर्जे त्वेति यजुर्वेदस्याग्न आयाहि वीतय इति सामवेदस्य
शं नो देवीरभिष्टय इत्यथर्ववेदस्य राक्षोघ्नः कृणुष्व पाजः प्रसितिं न पृथ्वीमित्येतमनु
वाकं अग्ने यशस्विन्निति चतस्रः प्राप्यं हिरण्यवर्णाः शुचयः पावका इत्येतमनुवाकं
पवमानः सुवर्जन इत्येतमनुवाकं वरुणसूक्तं उदुत्तमं वरुण पाशमस्मदिति षट्कं रौ
द्रं सूक्तं परि णो रुद्रस्य हेतिरिति षट्कं ब्रह्मसूक्तं ब्रह्मजज्ञानमिति षट्कं विष्णुसूक्तं = १५

न्वाह
विष्णोर्नुकमिति षट्कं पंचदुर्गा जातवेदस इति श्रीसूक्तं हिरण्यवर्णामिति पंचदशर्चं नमो
ब्रह्मण इति परिधानीयां त्रिरुक्त्वा प्रणवेनोच्छ्राप्य व्याहृतिभिः स्कन्नमित्यादिलिंगा=
भिः प्रोक्षति प्रतिसरसूत्रमादाय वासुकिं ध्यात्वा त्र्यंबकमंत्रेण त्रिर्ऋस्मनासम्मृज्याग्नि
रायुष्माणि तिदस्य दक्षिणहस्ते गृहीत्वाह स्वामेनि बध्नीयात्॥ स्त्रीणां वामहस्ते तस्मि
न्नृतसूक्तेन यो ब्रह्मा ब्रह्मण इत्यष्टर्चेन रक्षां कुर्यादित्याह भगवान्बोधायनः॥ ॥
इत्युदकशान्तिप्रातसूरवं धौ विधाय स्वोभूते प्रतिरोपासनं कृत्वैकविंशान्याहरौपिंजूलै
स्त्वधाविभक्तैः शिरोनाभिगुल्फदेशेषु संबध्य ताः प्रोक्ष्योदकं निरस्यापउपस्पृश्या
पो हि ष्ठेति तिसृभिः प्रत्येकमपः पीत्वा व्याहृतिभिः परिमृज्य शेषमाचमनं स्मार्तविधि
ना समाप्य स यजमानः सर्त्विग्भिर्मंत्रप्रोक्षणं कुर्युः॥ मंत्राः॥ दधिक्राव्णः॥ आपो हि ष्ठे
पवित्रवतीति तिस्रः ति तिसृभिः॥ हिरण्यवर्णामिति चतसृभिः॥ पवमान इत्यनुवाकेन प्रत्यृचं॥ कयानः॥ तरत्समंदीच
तस्रः॥ अंते व्याहृतिभिरिति॥ पत्न्यप्येवं पवमानादित्रयं कुर्यादिति तं च कृत्वा॥ देवसूक्तपरिम

एवमुपविश्य प्राणायामं कृत्वा यजमानो जपति
शिकेश्ववीयेयापुरु

ज्य स्मार्तं विमलं कृत्वा मंत्रैर्जलमभिमंत्र्य शिरः प्रक्षिप्य मंत्रप्रोक्षणं कुर्युरित्याह ॥ मंत्रेषु पवमान
१९ इत्यनुवाकांते महाव्याहृतिभिस्तिसृभिः सप्तभिर्वा द्रुपदया कयानश्चित्र आभुवदिति तिसृभिः अवते
हेळः उदुत्तमं वरुण त्वं नो अग्ने स त्वं न इति तिसृभिः ॥ तरत्समंदी तिस्र इति विशेषमाह ॥ अनुवाकांते व्याहृतिभिरन्यै नु
श्च पवित्रमंत्रैः प्रोक्षणं ॥ पत्न्या अध्वर्युः प्रोक्षितेत्याह केशवः ॥ ततः पुण्याहे अग्निः प्रीयतामिति तत्र रु
द्राग्न्यादय प्रीयतामिति देवः ॥ यद्देवत्यं भवति ॥ तस्य नामग्रहणात् सो प्रीयतामिति स्मार्ते । औपासनस्य
पश्चाद्दर्भेषु दर्भपाणी पत्नीयजमानावुपविशतः ॥ पत्न्या उत्तरतः पतिः । ऋत्विजस्तयोरुत्तरतः प्राङ्मुखाः ॥
यजमानः प्राणानायम्य विलुंध्याचा देशकालौ संकीर्त्य याः पुरस्तादित्यादिभिर्विशिष्टे स्येते आधानसंक
ल्पपूर्वकं सर्वकामसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अग्नीनाधास्य इति त्रिरूपां श्रुतिकर्त्रैवेदेत ॥ ॥
अथ त्रिकांडमंडनः ॥ ॥ प्राणानायम्य संकल्पं ससपत्नीरुपविश्य स्व ॥ तदर्थमग्नीनाधास्य यत्र शक्तो
धिकार्यहं वसंते मुकनक्षत्रे यदि वासुकपर्वणि ॥ ततस्तान् ऋध्यतामिति युक्ते ऋत्विजस्तत्र ऋध्यता राम
मित्यादि ब्रूयुः ॥ ॐ तथेत्यं ते आश्वलायनोक्तो वरणमधुपर्कौ कार्यौ ॥ ततो देवयजनं वैकल्पिकं । या ॥१९॥
वेनं वा देशमेषो यज्ञोरिमिकल्प्यात् ततः सर्वौर्त्विक् अहतवासः परिधाय शुचिः पूतो मेध्यो वि

पाप्मा ब्रह्मवादि सह कारि प्रत्ययः वै तुर्याहभिः समीक्षमाणः आर्त्विज्यं करिष्यन् जघनेन गार्हपत्य
मुपविश्येडा देवहूरिति जपेत् ततो ब्रह्मा तीर्थेन प्रविश्य मंत्रेण निरसनोपवेशने कुर्यात् न ब्रह्मजपं ॥
अथाध्वर्युः स्फ्यमादाय वेद्युत्करयोर्मध्येन प्रपद्य यजमानपत्नीभ्यामन्वारब्धः जघनेन गार्ह
पत्यं तिष्ठन् प्रागग्रं सानं गार्हपत्यायतनमुद्धंति । उद्धन्यमानमस्या अमेध्यमपपाप्मानं यजमान
स्य हन्व । शिवा नः संतु प्रदिशश्चतस्रः शंनो माता पृथिवी तोकसाता ॥ उपविश्य प्राप्य परस्परस्य अस्मि
न्काले दंपत्योस्तीर्थप्रवेशाद्भवतु सत्तं नरुद्देवौ पूर्वमेव यजमानः प्रपद्यास्त इति केशवः ॥ उद्धननप्र
भृतिविनाजकर्मोपस्थानांतं सर्वं सह याजमानमिति वृत्तः ॥ आयतनसंस्कारमात्रान्यजमानो
पि ब्रूयादिति देवः ॥ अथैनद्भिरवोक्षति शंनो देवीरभिष्टय इति न्युब्जपाणितलेन सेकोवोक्ष
णम् उत्तानपाणितलेन सेकः प्रोक्षणं विरकमुष्टिमासेको भ्युक्षणमिति विसर्गेण सह हरदत्तः ।
एवमितरायतनयोरुद्धननावोक्षणे अथ वेद्युत्करा वंतरेणाहवनीयं निष्क्रम्य पुरुषांतरे सहसं
भाराना हरति पूर्वमिव हतानंतर्वेदिनिधाय मंत्रैः संभरेद्वा वैश्वानरस्य तीति सिकताः । यदिदं दिव
इत्यूषान् ऊतीः कुर्वाणा इत्याखुकरं ऊर्जं पृथिव्या इति वल्मीकवपां प्रजापतिसृष्टानामि

तिस्रइदं यत्स्य प्रमितिवराहविहतं यत्पर्यपश्यदितिपुष्करपर्णी यानिरहं ह दितिशर्कराः अग्ने
रेतइतिषहिरण्यशकलानि अश्वोरूपमित्यश्वत्थ ऊर्जः पृथिव्याइत्यौदुंबरं गायत्रियाह्रिय
१८ माणस्यदेवानामितिद्वाभ्यांपर्णम् मयातइतिशमी यज्ञेसस्यस्येतिवैकंकतं यत्तेतोतस्येत्य
शनिहतं विविधयादितिविविधयसमिधः यातइतिमुंजकुलायं अश्वत्थाद्धव्यवाहायाअश्वत्थः
इतिद्वाभ्यामरणी सुसंभृतान्यंत्वेतिमंत्रावृत्त्यापुनः क्रमेणसंभृत्यारणी मुंजकुलायविविधया
श्वत्थहिरण्यशकलभिन्नांस्त्रेधाविभज्यनिदध्यादितितंत्रकृत् वैश्वानरस्येत्यादिनाप्राति
स्विकमंत्रेणायंत्वेतिमंत्रसहितेनेकैकंसंभारमादायत्रिधाविभज्यत्रिषुपात्रेषुनिदधातित्रिधा
कृतानंशान्निहितसंभारेरसंहतानन्नेदेनस्थापयेत् अश्वत्थाद्धव्यवाहेतिद्वाभ्यांयंत्वेतिव पि॰
स्फ्यादियज्ञपात्रैः सहारणीसंभरेत्यद्वाउपादीनरण्यतान्संभारान्यज्ञपात्राणि सहैवयो
अश्वत्थोयंत्वेतिसंभरेदितिदेवः यत्वेतिकेचित्सर्वतिसंभरंति क्रमेणत्विति कल्पः॥ ॥छ॥
॥अथगोपितृयज्ञः॥ ॥विहारस्यदक्षिणतः परिश्रितेदेशेप्राङ्मुखस्यासीनस्ययजमानस्य १८
श्मश्रुवपनंकृत्वोपपक्षावुपस्थाहक्षिणतोदानप्रवेशोऊर्ध्वग्रीणिचीणिदर्भपिंजूलानिउप

त्य नि
निधायकेशावपनादिनखकृंतनांतंकरोति केशावपनेमंत्रः वपेत्यप्यवेदिति उष्णदेशंयजमानोभिमंत्र
यते यानिमइति श्मश्र्वादिवपनेविशेषोपनार्के उदङ्मुख प्राङ्मुखोवावपनंकारयेत्ऊर्ध्वः के
शश्मश्रुलोमनखान्युद्दक्तस्थानिवापयेत् दक्षिणं कर्णमारभ्योधमीर्थमिति पत्न्याअपिमं
त्रवर्ज्यंकेशान्व्यतिरिक्तोपकक्षादिवपनमितितंत्रकृत् नेत्यपिदेवः॥ यजमानूखुदकुंभेनाभि
पत्नी षिंचन्चान्वयति इमाआपइति तूष्णींस्नापयति स्नानस्थानात्प्राङ्मुखस्याहतवाससीपरि
धायमानुषेणालंकारेणालंकृत्यांजाते हरदत्तीयेवैश्वानरः हेमभूषणसंपन्नः शुक्लवस्त्रा
नुलेपनः सुगंधिकुसुमैर्जुष्टोदिव्योलंकारउच्यते सएवपुष्परहितः सांजनोमानुषः
स्मृतः एषोनुलेपनाहतः पैत्रोलंकारउच्यतेइति कर्मांते उभौमानुषेणालंकारेणालंकृ
तोभवतोहतवाससाविति सर्वएवमानुषालंकारोन्यत्रनरुदादान्तीयेवेतइदाहंतीस्वज
मुहेकेप्रतिषेधयंतीति गंधपुष्पादिरलंकृत्यांजातइतितुकेशवादयः पत्नीभूयस्त्वेवाँस
वासामप्यलंकरणादि सोत्रंहिवन्वनंत्वविवुक्षितामितिहरदत्तः अथाध्वर्युरेकविंशति
दर्भपिंजूलैस्त्रेधाविभक्तैः यजमानयोःशिनानाभिगुल्फेदेशंपावयित्वौदपात्रमादा

पानं सं ॥ क्षीरपानं सीतु पानमिति एकैकं द्वेधा विभज्य षट् स्रक्तिनयं विप्रेभ्यो दत्वा वशि
ष्टानामेकैकं त्रेधा विभज्यैतद्वः पितरः पानमिति त्रीणि समर्पयेत् । एवं पितामह प्रपितामहाभ्यां
अद्भिः पयसाभिश्रितसक्तू नामेव वा धर्मब्राह्मणेभ्यः अर्धं पितृभ्यो दद्यात् । एतद्वः पितरः पिता
महाः प्रपितामहाः पानमिति । अन्येपि पक्षाय इतं त्रेडेयाः पूर्वमार्जित द्वेषेण तूष्णीमार्जय
ति । उपरिष्टादेव वा मार्जनं पानस्येति तंत्र कृत् । अनादृतं तु भवत्स्वामिने नत् । अथा साहितास्मा
णां परितः पिता पुत्राः प्रादक्षिण्येनोपविशंति । अनुजा बहवश्चेदुत्तरदेशे इति तंत्र कृत् । पुत्र
र्य इति बहुत्वं नित्य पर्वे वसायी निहरदत्तः ॥ द्वादशापि ता कर्षति । एवं ज्येष्ठानुजौ । समसंख्यो क
र्षति जयिनः । कनीयानवशिष्टान पकर्षति स पराजितो विषमसंख्या पकर्षणात् । यदि द्वौ
पुत्रौ पिता द्विगुणापकर्षं कुर्यात् । यद्येकः जायात्नीयाः । यदि नस्तुः पुत्रात् दंपती द्विगुणसंख्या
पकर्षणां कुर्यातां । एवमपत्नीकाग्निहोत्रे पिता पुत्रयोर्द्वयो द्विगुणापकर्षं इति हरदत्तः
कृतं कृतमिति वदंतः । कर्षणं कुर्युः ॥ पराजितस्यायं जपो वा द्यूतावसाने सर्वेषां जपो । १९

वेति पक्षत्रयमवादितं तंत्र कृत् । द्यूत ऊ दन इत्युक्तो त्थाय पराजितादोहनपर्यंतं द्रव्यं याचामि
निकेत्रावः क्षत्रियकर्तृक एवाधानेक्ष द्यूतं इति विद्यारण्याः ततो यजमानः शूर्पे सकृदेव व्री
हीन्निर्वपति । पितृभ्यस्त्वा पितामहेभ्यः प्रपितामहेभ्यो जुष्टं प्रोक्षामीति । तूष्णीं वा प्रोक्षति । पि
तृभ्यस्त्वा ० जुष्टं प्रोक्षामीति । तूष्णीं वा । कृष्णाजिन उलूखलं निधाय मुसलेनावहत्य फलीकृता
न्प्रक्षाल्य तंडुलोदकं पात्रांतरे निधाय वारु मात्रं चाधिश्रित्याभयं पर्यग्निकृत्वा वेरोतु परिष्टाद्दि
प्रभृतमाज्यं पयोवानीय दर्वीं स्रुवौ संमृज्याभिघार्योद्वास्य वपाहोमार्थं दक्षिणोत्तरकं पिंडं मुद्धृत्य पंचस्रुक वा कृती
र्जुहोति । याम्यानी । ० नमः स्वाहा पितृ इदं । अंतर्धि । पितामहायेदं । अंतर्दधत्तु तृप्तिः सर्वैः ० प्रपिता
महायेदं । यन्मे माता ० पित्र इदं । यद्वः कव्यादं ० पितृभ्य इदं । वपार्थं पिंडं त्रेधा विभज्योपस्तरणाभिघा ६
रणवर्जितो द्वे वर्या स्रुवा जुहोतीति तंत्र कृत् ० उपस्तरणादि युक्त मिति केत्रावः । सोमाय पितृम
ते स्वधा । अंगिरस्वत स्वधा । यमायांगिरस्वते पितृमत इदं । यदग्ने कव्यवाहन ० अग्नये कव्यवा
हनायेदं । दक्षिणाग्नौ निधाय पिंडान्कृत्वा द्वितीयोदकं गाधेनि तूष्णीं मार्जयित्वा उपस्तरणाभिघा

एतान्पिंडान्ध्यात्वा॰ पिंडानामाक्रमणे नोत्तरेणाभिघारितोपयनेनोमार्जनोपसंस्थह इतिभवोक्तेः।
२० अत्रैतत्तदेवहन्तरामेत्त॰ मास्मैषाइत्तिप्रथमं॰ एतत्तेपितामह॰ एतत्तेप्रपितामह॰ इतिपरे॰ मंत्रेत्यागेव
दार्मणोतेगोत्रो॰ वारतांवैकल्पिकमितिहन्तहन्तः॥ अत्रपितरोयथाभागंमंदध्वमित्युक्त्वा हित्वो यो द
कुंभशेषेणामार्जयित्वा तंडुलप्रक्षाल्ननं पूरितंनृतीयंभूमौप्रवाहयेत्॰ यानिरक्षांसि॰ येनःपतिना
गर्भाः यत्रामाः येकुमानाः आंजनाभ्यंजनवासांसि मंत्रैर्दत्वा षड्भिर्नमस्कारैर्विपर्यासमुपति
ष्ठते॰ तत्तीयपिंडानुसंधानपूर्वकं प्रपितामहादिक्रमेण व्यर्थद्वलिव्यान्तव्योहरस्तः नमोवःपितरो
रसाय॰ नमोवः॰ शुष्माय॰ नमोवः॰ जीवाय॰ नमोवः॰ स्वधायै॰ नमोवः॰ मन्यवे॰ घोराय॰ वीरं
मेपितरोदत्त॰ वीरंमेपितामहदत्त॰ वीरंमेप्रपितामहदत्त॰ उत्थापयति॰ उत्तिष्ठतपितरः मनसाना पितृन
मनुगच्छति॰ यंतुपितरोयथालोकं मनसाजवेन॰ अनुगतंमनआहूयते॰ मनोन्वाहुवामहइति
तिसृभिः॥ ॥अथयजमानः परिहितमहतंवासः गोपितृयज्ञविदेहवोसर्गमन्ययेनिवासः
परिधाय दक्षिणतोमत्वाआचम्य चतुर्थोदकुंभेनमार्जयति॰ यासुंधरे॰ याऊर्जे॰ यासांनि २०

ष्क्रमणेसर्वमिदं॰ यासामिमे॰ याःप्राचीरेवती॰ यादक्षिणा॰ याःप्रतीची॰ याउदीचीर्या
ऊर्ध्वान्रेवतीरित्येताभिर्मार्जयित्वापरिहितं त्याज्यंवासोविमुच्य क्षौमंवपरिधायप्राजाप
त्ययाग्नेः समीपंगत्वापृथक्कृतमुल्मुकमग्नौप्रक्षिपति॰ अभूद्दूतइति॰ गवामजाब्राह्मणेभ्यः
पिंडानोदनंवदद्याऽध्वर्युस्तस्मिन्नेवाग्नौजयादीन्जुहोति। यजमानोवा। चित्तंचचित्तिश्चयो
ह्याभिर्जयाहुतयः॥ अग्निर्भूतानामितिसप्तदशभिरभ्यातानाः इतिदेवः॥ यजमानकर्तृक
होमपक्षेप्रतिहोमसप्तदशानांवापितरइत्यादीर्वान्वनमध्वर्युणाकार्यं न स्वकर्तृकहोमपक्षइ
तितत्रकल्पः स्वकर्तृकहोमपक्षेतुपितरइतिमंत्रेण प्राज्याहुतिः। पितृभ्यःपितामहेभ्यःप
रेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यइदं पितरःपितामहाःपरेवरेततास्ततामहाइहमावत॥ अ
स्मिन्रं॰ नरनाथाइत्याद्याः सनोभुवनस्यपतइत्यंताः राष्ट्रभृतः। यद्देवादेवहेडनइत्य

स्रुवाकेन प्रत्यृचममात्यहोमः॥ अस्मिन्नाधाने तु गृहस्यादभ्यातानेषु वान्तरं। भवेत्पितर इत्या
दे जस्य पुत्राहिषूहनं। राष्ट्रभृत्सु तथा लिंगमनुषंगेन वा जहौ। स्वाहाकार इयांते वा होमः प्रत्ये
कमेव च। अन्येधियंति रित्यादिमात्रमेवानुषजते। अभ्यातानेष्विति प्रादुर्होमे पितर इत्यपि।
अंगमेवैवेदित्यन्ये निरूढफलतस्त्विदं। अंगपक्षे द्वितीयादाबाधाने वचर्यं भाव्यतां। अनित्य
त्वं निरूढत्वे फलसंबंधहेतुतद्वितिकाङ्क्षाः॥ अथ गोपितृयज्ञाः॥ ॥गोपितृयज्ञाभावे संभारस
भरणानंतरं यजमानाः केशानोप्यस्नात्वाहूतवासः परिधायालंकृत्वाग्नेः। इतिदेवः॥ उद्ध
त्याबोध्ये त्यादिना कृतमनुस्मारयति व्रतोपायनीयमित्यक्षारालवणार्थं इति केशवार्को गोपि
तृयज्ञाभावे वपनादिकार्यमिति वृद्धाः॥ ततः सर्पिर्भूयिष्ठेन पयोभूयिष्ठेन वा भोजितो २१
भवतः। अथ वृक्षारोहणेन ह्रियमानस्य यें काले तिलमाषव्रीहियवप्रियंगुवेणुगोधूम

कुलित्थश्यामाकनीवारजर्तिलगवीधुकगार्मुतकुरुविंदसमुष्टिनान्प्रक्षाल्य आज्यस्थालीं स्रु
वांस्रुवं च बर्हिर्वासोदीयां छकलानित्याद्यायवाससाप्रच्छन्नाऔपासनाग्निं ब्रजंति। अर्धं सर्वं वा
ब्रह्मौदनिकं कुर्युः॥ पचनाग्निं कपालादिसंतापजमौपासनं विकल्पमाहुः केशवादयः। हर
दत्तस्तु उत्तपर्यनीशब्देनौपासनं व्याख्याय सर्वाधानिनो विच्छिन्नाग्नेराधाने बनीषं प्रथमाधानि
नानुत्तपनीयमिति व्यवस्थां विकल्पेन्वाह॥ अर्धाधाने विशिष्टार्थं गृह्याणि अष्टकादीनि औपास
नहोमस्तु वैकल्पिकः सर्वाधाने ष्टकादीनि लौकिकाग्नावित्याहतं न कृतं॥ सर्वाधानपक्षेपि
ब्रह्मौदनाग्नेः संवत्सरादिधारण्यपक्षे औपासनहोमस्य कार्यत्वे ब्रह्मौदनं पत्न्या धारयेत्यत्र म
ध्नि सेक्त्संरपदं च तुनो वा मासा न मासं द्वादशाहं व्यहं वा सायं प्रातर्होमैः शुश्रूषमाण इत्ये
कद्वित्वान्यार्यैव वचनोपसूत्रे वैधेयभिधानात्॥ अथाधास्यमानो ब्रह्मौदनं पत्नीत्यवधारणप
क्षे तु सायमौपासनहोमो नांनितः प्रातस्तु स्थालीमग्निहोत्रेणातएव पूर्यतेन इत्याह हरदत्तः॥ अ

थाग्ने र्ब्रह्मा दक्षिणतो निरसनोपवेशनो कुर्यात्॥ यत्र यत्र क्रियाध्वर्योस्तत्र तत्र वद क्षिणा॥ भव
ति कल्पात् तां ब्रह्म यज्वानौ न वेदन्यत्र तत्क्रिये॥ अध्वर्युः शकलानग्नौ प्रक्षिप्य परिस्तीर्य पात्रासादना
दि आज्यसंस्कारांतं कुर्यात्॥ पात्रप्रोक्षणकाले सर्वौषधमपि प्रोक्षेदिति देवः। यजमानो ज
लिनोपस्तीर्णाभिघारितं सर्वौषधं जुहोति। अग्नये नमः। अध्वर्युस्तस्मिन्नेवाग्नौ स्रुवेणाज
यादीन्हुत्वा चतुर्गृहीताभ्यां प्राजापत्यानुख्ये जुहोति। यजमानः कुंडेश्मानावंगारानरक्षि(?)ति।
आयुष इति। तानादायोत्तिष्ठति॥ आयुर्मामिति। अध्वर्युस्तानादाय यजमानान्वारब्धः सं
प्रच्छन्नएवोत्तरतो गत्वा यथेतमेत्यो(?)न्तरेणाग्न्यगारं पत्नीत्यपूर्वया द्वारा प्रविश्य वेद्युत्करयो
रंतरेण गत्वा गार्हपत्यायतने गारान्न्युप्योपसमाधाय परिस्तृणाति। परिसमुह्य पर्युक्ष्य प
रिस्तृणाति। निकेशावः। उत्तरतो दर्भेषु सादयेत्। मेक्षणेन सह स्थालीं। मुसलोलूखलं तथा। २२
शूर्पं निर्वापपात्रं तु घृतस्थालीं स्रुवेण तु। चर्मसु(?) प्रोक्षणीपात्रं व्युद्धारं [...] चिनियत्रयं॥

मिति। मेक्षणेनैवाभिघारणमिति। भवंतु न स्रुवासादनं। मेक्षणेन स्रुवभिघारादिन स्रुवेणेति केचन।
तत्पक्षेणा स्रुवासाद्यो होमे मेक्षणमेव तु। होमाभावे स्रुवेणैव त्यपरे व्यवस्थिर इति कल्पात्
दक्षिणतो ब्रह्मयजमानौ नुपविश्य तूष्णीं संस्कृताद्भिरद्भिः पात्राणि प्रोक्ष्याग्नेः पश्चात्प्रा
चीनग्रीवमुत्तरलोमानडुहं लोहितं चर्मास्तीर्य तस्य पृष्ठे ग्रीवायां वा चतुरः पुरुषाहारान्
स पवित्रेण पात्रेण व्रीहीणां निर्वपति। ब्रह्मणे जुष्टं निर्वपामीति। चतुर्वारं मंत्र इति भवदेवो॥
मंत्रेण त्रिः सकृत्तूष्णीमिति हरदत्तः॥ लोहिते चर्मणीति सूत्रे बौधायनस्यायलोहितस्या
दितिशा॰ ब्रह्मौदनस्य मंत्रा मंत्र इति मंत्रवान्स्यादिति बौ॰ तूष्णीमिति शा॰ ब्रह्मौदने इति स्य
निर्वपण इति पवित्रवता पात्रेण मंत्रवान्स्यादिति बौ॰ पवित्रेण तूष्णीमिति शा॰ रिति द्वैधं मं
चपक्षेति मरुशाति आकृत्यै त्वेति। पुनर्व्रीहीन् शूर्पे समुप्य चर्म [...] निरस्य व्रीहीन्नास्
मंत्रेण ति ब्रह्मणा इति तूष्णीं वा। हरदत्तभवदेवौ मंत्रवत्प्रोक्षणमित्याहुः। अवरुणादिकृतं चर्मो
सारयामीति व्याख्येयौ। हविः प्रोक्ष्य तस्मिन्नेव चर्मणि कृष्णाजिने वा वलूख्य त्रिः फली

पति
कृत्वाग्निः प्रक्षाल्य पवित्रवत्यो रुखात्यां निर्वापपात्रे चतुर्वारं क्षीरमपो वाऽऽनयेत् । अपर्याप्तात
२३ तो धिकमप्यानयन् स्थालीमग्नावधिश्रित्य तिरः पवित्रं तंडुलानावपति । शूर्पेण स्थाल्यां तं
डुलानोप्यानयमिति केशवः ॥ ब्रह्मौदनस्य श्रपणपर्यग्निश्रपये त्रिधिति बौधायनो ऽग्नि
तिशालीकि नैवास्मिन्नाग्निं वेन्न निर्षिवेदिति बौधायनः काममस्मिन्नाग्निं वेन्ननिर्षि
वेदिति शा॰ विस्नाव्यं तं स्रुपवं तं नेमित्यो प॰ इति द्वैधं । कुशलः पर्तीधेन श्रपयन्निध्वर्युरा
ज्यं संस्कृत्य मेक्षणी स्रुवं च संमृज्य चरुमभिघार्योदंचमुद्वासयति । अथायाति गवेकाले
परिकर्मिभिः श्रुतो ब्रह्मौदनः त्वचुके महर्त्विजो नुद्विशामन्योन्याभिमुखा उपविशंति । अ
थ यजमानः पात्रीं निर्णिज्योपस्तीर्य तस्मिन् ब्रह्मौदनमवालयन्नुद्धृत्यौदनमध्ये गर्तं कृत्वा
प्रभूतमाज्यं तस्मिन्नानीय मेक्षणेनापहत्य प्रवेधसद्वृति स्वाहांतेन ब्रह्मा स्वाहाकाररहितेनाप
रुणाय वाऽनुद्विशामुपविष्टा यानानुपूर्व्यमानमय्यते षां मध्ये ऽभिमुपस्थरान्नेनु नं चरुं प्र
नेशायनित्यद्वामोमेन तूष्णीं वा । चतुर्थं मंत्रेषु पृथक् पृथगुपोहति । निर्णेजनादधुपोहांते २३

यजमानः स्वयं चरेदिति कल्पात्‌॰ ब्रह्मौदनस्योपस्तरणादि इति बौधायनस्य नोपस्तरणमिति शा॰ली॰ ब्र
ह्मौदनस्योपस्तरणादि नियज्ञो मोपनमलिनिवात् हलीवेति पूर्वः कल्पो बौधा॰ तरः शालीकि ब्रह्मौ
दनस्योपासनादि इति क्र पय एव ब्रह्मौदनं प्राश्नीयुरिति बौधा॰ यएव केवननियानादि इति कात्यायनो
हस्मोहोपमन्यं वा महार्त्विज एव प्राश्नीयुरिति द्वैधं । अनुद्विशामुपवेशनानकथनावसरे हरदत्तेनुम
रतोदक्षिणामुखमुद्गातारमुपवेशयेत् तदभावे आग्नीध्रमुपवेशयेदित्याह । ब्रह्माणिरसनोप
वेशानेकृत्वा प्राशयेत् । मध्याह्नासनं यथा व्यतेभ्रदांसंति । राहस्तादि तितेभ्यः सांडं दद्यात् । ब्ध्व
त्वान्न्यप्रतिगृह्णं तिरुद्रायगामिति प्रतिग्रह इति केशवः । उत्तरत आसीनो ब्राह्मणः क्षामका
यं प्राश्नाति तस्मै यजमानो यत्किंचिद्ददाति । व्युद्धरण पात्र्यां यदाज्यमवशिष्यते तेन चित्रि
यसमिधो ऽभ्यज्याभ्यादधाति । समिधा॰ उप चाग्ने हवि॰ तं त्वेति तिसृभिः समिधामभ्याधानं इति
सत्यं शा॰ र॰ बौ॰ सकृत्प्राशित्रे प्रत्यवमर्शे समिधो ऽभ्यज्यादधाति त्रीवोत्रैवेनो पार्श्वतः समज्य
सादयेत्तेन परास्वैःप्राश्नी मुष्मथेनां पात्रीं निर्णिज्योपस्तीर्य यस्मात् स्थाल्या आज्यमवशिष्टं स्यात्

नसमिधोभ्यज्यान्वर्ध्यादि निद्वैधे। एतत्सूत्रस्वस्वसादेवस्याभिवचनात्। यजमानकर्तृकमेवसमि
दाधानं। समित्वाहिता स्युः। अध्वर्यो वसतेनीनेददामीतिवदेदिति केशवः। सांउश्चतुर्थ्यो गदितः
समिन्धः प्रणीड् तौ न जातमायजानइतिकल्पः। अथास्मा अरणी प्रयच्छन्नाह नानयमो॰ ष्यय
जमान आह। ब्राह्मणानित्यादि। कर्वोदधिकुर्धघृतभूयिष्ठान्नेनब्राह्मणान्भोजयेदिति हरदत्तः।
अध्वर्योरारणी प्रतिगृह्णन्नाह महीविश्पत्नी॰ तेउरसिश्लेषयति। त्रूलियवतीस्थो॰ अध्वर्यु
राह। अनृतं विहाय सत्यं वा न्यं मानुषं विहाय दैवं कर्मकार्यमिति। यजमानः इदमहमनृतात्स
त्यमुपै॰ यजमानः सर्वरात्रिंशाल्के रग्निंप्रज्वलयति शाल्के रिति निदेवः। कृत्स्नंरात्रिं चधिकर
णसमिंधनांगत्वेन मंत्रविधानात्सकृदेवतत्प्रयोगः। गार्हपत्यो नरतः कृत्स्नमनवध्यानेनयज
मानमीक्षयति। अप्रजा अस्मइति। अरण्योः प्रदानइतिसत्तमानार्ययोरन्नोहवापररात्रए
वास्माअरणी प्रयच्छेत्। वरंददामीत्यवबा वंविसजेदिति निद्वैधे। अस्मिन्पक्षेवावर्यमाद्य परर
त्र एवात्युपदेश इति केशवः। अरणीप्रदानाद्यपररात्रे वा। अरणीदानोपक्लेषवर्जं सर्वं पूर्वेद्यु २८

त्येवेत्याहतंत्रकृत्। अथाध्वर्युरपररात्र उपव्युषमरणी उत्तरां दक्षिणेनादाय सव्येनाधरामादा
यनिष्ठतपति। जातवेदो यत इति। एवमग्निं संतं समुप्याग्न्यायतनानि शकृत्पिंडेनपरिलेपय
ति। अपेतेति। अपातनानां परिलेपनइति सूत्रे शा॰र॰बौ॰ गार्हपत्यायतनमेवैकं परिलिंपे
दितिद्वैधे। तूष्णीं परिलेपनइति तंत्रकृत्। अथयजमानपत्नीभ्यामन्वारब्धः संभाराणां तृ
ना तीयभागमादायमंत्रावृत्त्या निवपति। यत्पृथिव्या इति। सकृदेवमंत्रमुच्चार्य युगपन्निवपेत्।
यदोषान्पश्यति तदभिमंत्रयते यददइति। चंद्रमसि कृष्णं ध्यायेत्। द्वितीयपक्षे उपेक्षुनिपतत्व
जपेदिति हरदत्तः। तान्स्पृष्ट्वा जपति। दिवस्त्वेति। मिश्रयति। संवःसृजामीति समीकरोतिकल्पे
नामिति। अतिशिष्टानामर्धानादाय दक्षिणायाद्वारागत्यान्वाहार्यपचने निवपति। यदंतरिक्षस्ये
ति। अपसव्यमावृत्य पूर्वया द्वारागत्य तृतीयभागमाहवनीये यद्दिवइति शेषमुभयत्र पूर्ववत्।
संभारमंत्राः सह यजमानास्त्रियं वरा ध्यं स्वयमेव यजेत्वा। आधानमंत्रास्तर्थो उभयोर्न वचष्टैव
कुर्यान्निर्जलप्रदानं। उपासनोपस्थिति घोरतन्वो विराङ्मा श्रोभयभाषणीया इति क

स्थः अध्वर्युर्गौमारमाह। अश्मीवस्सखेति। सखाह। विहृतानामग्नयदृतिसंभाराणामियपन्न
वेणालीकरणौगार्हपत्यायतनेऽश्वेना। सर्वैर्मन्त्रैः परिलिख्य मंत्रेण निर्वपेदिति द्वैधे। अथाध्वर्यु
र्दक्षिणानात्वस्य गार्हपत्यायतने संभारेषु मुंजकुलायं निधाय तस्मिन्नधरारणिं आयुगं नानु
ह्नायतानाग्नत्वमग्नेरन्निधाय दशहोतारं जपित्वोत्तरारणिं निधाय मंथनेतिश्रुत्या। गार्हपत्य
स्थानमाहत्यारणिं मुंजकुलायेनिधायेत्याह देवः। यजमानः प्रथमो मंथति यजमान उत्तमो मं
थतीति वचनादितरान वरं ददाति। अध्वर्यो वरं ददामीति केशवः अध्वर्युर्ब्रह्मण्यां देय इति भवः
इक्रमंथनारंभकालेऽरण्योर्निहितो जातवेदा इति साम गायेत प्रज्वलितो दशमिगावुक्तिम
द्रीतिरतंत्रके। अध्वर्युणा सह यजमानो जातमग्निमुपतिष्ठते। अजीजनन्निति। यजमा
नोऽग्निरूपमिमा सिष्यावायुर्निष्कामयति। प्रजापतेस्त्वेति। निधीयमानेऽग्नमीडयति गाये २५
त्। अध्वर्युराह रथंतरं ब्रूहीति। अभिव्वायुक्ता नागायित्वा तदभावे ब्रह्मन्छंदांसि ब्रूहीति।
ब्रह्मा हिंकारं वा हृत्वी यो मिंवाभिर्वदन्॥ सामानि नेन्न प्रतिधीयते योनिं निगदेदपि वा व्या

हृतीरपि वा हिंकारेणेतिकर्मेति। अथ गार्हपत्यमादधाति। भूर्भुवो धर्म इति। आयतने मंथनप
थनपक्षे स्पृष्ट्वा जपति नत्वेनावधारयति ज्वलयति त्वेति भवः। भृगूणां त्वेति भार्गव इति वा भृगूणां।
अंगिरसां त्वेति आंगिरस इति वा अंगिरसां आदित्यानां त्वेति काश्यप इत्येवं सर्वेषां। वान्येषां।
अग्नेरुत्तरतो ग्नावेव हिरण्यशकलमुपदधाति स्वयातनुवेति। रजतशकलं तत्र इ्रायप्रयच्छ=
ति साध्वर्युर्यजमान उपतिष्ठते। अहं त्वदस्मीति। गार्हपत्यादग्निमादाय दक्षिणायां द्वारोपानि
ष्क्रम्य दक्षिणाग्निमादधाति। भूर्भुवो वात इति रजतदानां तं क्लोपतिष्ठते। इमा उ मामिति।
अथापसव्यमेत्य त्रिः प्रादेशप्रमाणैरुपरिमितैः समिद्भिरिध्मं कात्स्न्येण यनयोग्यं गार्हपत्ये
न्याधाय स्रुहस्रवमग्निधारणपात्रेण्युप्य स्थापितं युवानमश्वं गामजमविक मंडलुं वा गार्हपत्य
स्य पुरस्तात्स्थापयित्वोद्गातारमाह वामदेव्यं ब्रूहीति। तदभावे ब्रह्मन्निति विशेषः। आदीप्तमग्निं पा
त्रेणिधायापयमनोपयम्याधूह्छती। ओजसे इति। गार्हपत्याहवनीययोरन्तराऽस्य भाग
र्थयक्रमेणा नाचुरदर्श नाभिरदर्शथी वाद धनुष्पृथ्त्व्यगच्छन्। आददान एवैना मात्राः संपा

आ॰प्र
२६

दयेद्वा। इध्मस्य हरणमिति सहस्माहो॰ आनुदर्ध्ने प्रथमं हरेऽथ नाभिदघ्नेऽथ ग्रीवादघ्ने प्राणोत्स
नाति हरेदिति आदेशान एवैतामात्राः संपादयेत्प्रमाणात्स्वेवनातिहरेदिति शालीकि॰ निर्देध्य पुरस्ता
न्नीयमानमश्वमनुमंत्रयते। प्राचीमनु प्रदिशमिति मध्ये उपरमति। विक्रमस्वेति। गच्छति अन्वग्निरि
ति। अग्निमन्यस्मिन्हस्ते प्राङ्मुखाश्वस्य दक्षिणेन पूर्वपादेन संभाराणामुत्तरदेशं आक्रमयति।
तथाहितांगारा अश्वपदमनुधावंति अश्वं प्रदक्षिणमावृत्याक्रिरभ्युक्ष्य देवंगमयित्वाध्वर्य
वे दद्यात्। अन्यमश्वं दक्षिणां ब्रह्मणे अश्वस्य दानइति। अध्वर्यवे एनमश्वमग्निपरं दद्यादिति
बौ॰ न्यं ब्रह्मणे न्यमश्वमेव इति शालीकिः इध्मस्य निधानइति सूत्रं बौ॰ तूष्णीमेव निदध्या
दिति शा॰ रिति द्वैधे। प्रदक्षिणमावृत्य प्रत्यङ्मुखइध्ममाहवनीये संभारेष्वधादिति सर्वो दि
तेवा सूर्यं प्रतिष्ठापयति। यदिदं दिवइति डङ्गा तारमाह। बृहद्धारवंतीयं श्येतमिति गायत्री बृ
हती गीयमानम् आहवनीयमादधाति। भूर्भुवः सुवरिति मंडलमुपस्थायादित्यमुपतिष्ठते
इत्यत्र यथा मंडलप्राधान्यं प्रथमतः पश्चादादित्य प्राधान्यं तथा इध्मप्रधानानंतरं केवल २६
[तिष्ठाप]

मग्निमेव प्राधान्येनाहितं प्रतिष्ठितं करोति। स्यर्थ इति व्याव स्वौ आहरस्तनः। रजतप्रधानं तं रुक्मोप
तिष्ठते आनड्वाहइति। सभ्यावसथ्ययोः करणइति कुर्यादिति बौ॰ नकुर्यादिति शा॰ तयोर्हरण इति
आहवनीयादेवैतौ विहरेदिति बौ॰ ग्रामाग्नेरिति शा॰ निर्मथ्यौ स्यातामित्यौपमन्यवो ऽत्रो॰ वीपु
त्रः सभायामेव सभ्यं व्यपदिशति शेलः आवसथ आवसथीयं पर्वणिर्वैतयोः स्थालीपाकं श्रपयि
देत त्वा ब्रह्मणे जुहुयादद्वैदपि न कुर्यादित्याजीगविरिति द्वैधे। आहवनीयप्राचीनदेशे सभ्यः तत्प्राची
नेत्वौसथ्यीयः। तयोरुद्धननप्रोक्षणसंभाराणां विकल्पः व्याहृतयो धर्मः शिरइत्यादयश्च नस
ति। भूग्न्रणामित्यादिनाधानमिति तंत्रकृत्। रूपार्मत्रवदाधाने वैकल्पिकं तूष्णीपक्षे उद्धननादिक
मपि तूष्णीमेव विहरस्ततः वेदेरुत्तरपार्श्वे गार्हपत्यादाहवनीयं रुक्मंच्क्रं प्रवर्तयति। रथचक्रस्य कर
ण इति बौधा॰ नकुर्यादिति शा॰ त्रो॰ वारथमेवैतं सयुक्तं प्राचं प्रवर्तयेन्न मृत्विग्भ्यो दद्यादित्याजी
गविरिति द्वैधा। अग्नीन्परिस्तमुच्य परिस्तीर्य यजमानः सर्वौषधं व्याहृतिभिः स्वाहाकारांता

भिः सर्वैर्वा भिर्जुहोति। चरुं श्रपणीनाविषयेणा हस्तः सर्वौषधेर्वा जलके खवास्यान्दइतिक
ल्पः। ततः आज्यं संस्कृत्य स्रुक्स्रुवं च संमृज्यैकस्मिन्नेवाग्नौ पंच पंच नाना वृक्षीयाः समिधो
भ्यज्याऽऽदधाति। स मूहमपमुक्ष्य परिस्तरास्रुः कृतेरामः स्याहुत संकृतिश्वा। अश्वत्थपूर्वाः समि
धः पुरोक्ताः स्वाहेति वा तेन दूर्वां कर्मोयं। समिध्यमानोथ घृतप्रतीकस्त्वामग्न आदीन् वा घृतप्र
तीक इति कल्पः। संभारनिवपनाद्येतदंतं यजमानेनान्वारंभ इति तंत्रकृत्। ततः प्रदक्षिणमाव
त्य गार्हपत्यस्य पश्चात्तिष्ठन्यजमानेन पत्न्या सहितो गार्हपत्यादीन्प्रत्येकमुपतिष्ठते। ये ते अग्ने
शिवे इत्यादिना। यास्ते अग्ने घोरा इत्यनुवाकद्वयं सकृदुक्त्वा प्रत्येकमपउपस्पृश्य पुनर्यास्ते अ
ग्ने घोरास्तनुव इति ब्रूयात्सुमुग्छो हतिपाप्मानं गच्छ तिब्रूयादिति देवः। तनूषु य च वा पतिवर्क्षिग
छ यास्ते तया स्वित्कच घोरतन्व इति कल्पः। अनुवाकद्वयपठद्यास्ते अग्ने घोरास्तनुव इति २७
यजुर्मन्त्रं वेति तंत्रकृत्। जघनेन गार्हपत्यं तिष्ठन्नेव त्रीनग्नीन्प्रत्येकं वोपतिष्ठते। नर्य प्रजां मि

त्रि गार्हपत्यं। अथर्व पितुं मे गोपायेति दक्षिणं। शंस्य पशून्मे इत्याहवनीयं। सप्रथेति सभ्यं। अहे बुध्निय मं
त्रं आवसथ्यमिति देवः। सभ्यावसथ्याभावे तन्मंत्राभ्यामाहवनीयमुपतिष्ठेतेति हरदत्तः। प
श्चादग्निर्मूर्धेत्यादिना प्रत्येकमुपतिष्ठते। यः कामयेताग्नयो मे संतन्यमाना ऋध्नुयुरित्यादि
शेषसूत्रमादित्य पिसः। ततः स्मार्तवदाज्यं संस्कृत्य चतुर्गृहीतं गृहीत्वा चतुर्ध स्रुवेणाज्यं पुनः स्रुचि
गृहीत्वेति व्याख्याहरदत्तः। आहवनीये कांचित्समिधमाधायाऽङ्किपरिषिच्य परिश्रिते अपरिश्रि
ते वा तिष्ठन्नासीनो वा जुहोति स सलन इति। अग्नये पृथिव्या इति। कर्मेति केन मंत्रेण वा। समुच्चि
ताभ्यां वा। अध्वर्यवे वरं ददाति। अध्वर्युर्ब्रह्माभ्यामिति देवः। ततः कूष्मांड ई त्वा वैश्वानराये
त्युपस्थाय यन्मे मनस इति समिधमाधायाध्वर्यवे वरं ददाति। यः कामयेत विपाप्मा ब्रह्मवर्च
स्यनूचानो भूयासमिति स विराजं क्रमैश्चरित्वा पूर्णाहुतिं हुत्वा कूष्मांडैः स्रुवाहुतीर्हुत्वा स
मित्पाणिर्वैश्वानरायेत्युपस्थाय समिधमाधायाध्वर्यवे वरं ददातीति शेषसूत्रे विहि

तत्वात्। ततोयजुर्भिः सामनोभेषनिमित्तं कृत्वा तूष्णीमग्निहोत्रं कृत्वा पूर्णाहुतौ तूष्णीम
२८ ग्निहोत्रइति सत्वं रथंतराणां। अ०नः पूर्णाहुतिमेव जुहुयान्न तूष्णीमग्निहोत्रं इति तूष्णी मि
मग्निहोत्रमेव जुहुयान्न पूर्णाहुतिमिति शां० करणपक्षेपि सति कर्तव्यता को होमस्तू
ष्णीकर्तव्यः। प्रधानमात्रं वेति भवः। प्रधानमात्रं तूष्णीं भाविष्युपरुष्ठानि विकल्प इति
तत्र कृत्। अथ तनुहवींषि। तनुहविर्भिर्यक्ष्ये। तनुहविः संबंधि हविः त्रीहिमयः पुरोडा
शश्चरुश्चेपंच प्रयाजाः। अग्निरग्निः पवमानः अग्निः पावकः। अग्निः शुचिः इड।
श्रीश्रहितिरिति प्रधानदेवताः अग्निः स्विष्टकृदित्या दिपौर्णमासं तत्र अध्वर्युरि
वागातुविद इति जपेदिति तत्र कृत्। नेउ जपः आधाना स्येकृतत्वात्। पवमानेष्टीनां
त्वपृथग्वनणाभावादिति तद्दाशयः। इध्मत्रयं विंशतिधाय्यूहः। पात्रासादने कपा २८
ल। निवरुस्थाली मादित्यस्य घृतश्रपणपक्षे घृतश्रपणपात्रं वासादयेत्। प्रणी

५५

ताः प्रणीय घृतं च प्रणयेत्। ब्रह्मन्घृतं प्रणेष्यामि अनया घृतं प्रणयामीति वोहः। चरु
र्घृतेस्याद्यक्षितत्वेणेयं पात्रांतरे भैषवनूस्तथोद्यमिति कल्पात्। यथादैवतं निर्वापादि
निर्वापाक्षियथालिंगमूहोयज्वाभिमंत्रणेउहे सयज्ञियादेवी देव्यो यादइति पंचकमिति
कल्पः अधिवपनकालेवरव्याणां विभागः। चत्वारोष्टैकपालाः। तत एकादशकपालः
ततः आदेवयजंवहेत्यंगारमानीय स्थाल्यां तिरःपवित्रं प्रणीतोदकमासिच्य ध्रुवासी
तिनां निधाय प्रदक्षिणमंगारैः परिचिनुयात्। यथादेवतं संपवनविभागो। नेडुत्प्र
क्षेपघर्मास्थकिश्वायुषः। चरोः पाके जातकल्प पवित्रवत्यां तरुस्थाल्यां घृतमानी
य श्रपयतीतिवः। घृतप्रणीता उपहत्यसेकेहा घृतेसंघृतमङ्गिरा दिरस्तज्यस्त
रेवन्मधुमत्तथाग्मद्यथार्थमूहो घृतमिश्रुपाकेइति कल्पः। आह रघृतमानयेति
सघृतमङ्गिरग्मनसमाषधयोरसेन। सं रवतीजगतीभिर्मधुमतीमधुमतीभिः स्व

२९ ध्यस्वेति चोहः। यथा देवमुद्वासनं तोन्त्र इति वचने अग्न्याद्युपांशवः चरोस्तथा वद्यातुमि
क्षणेनेति विकल्पः। अग्निरहमन्नादः पवमानपावकशुचीनामन्नाः शुचिः पूत इति वेति दक्षः
आदित्या॰ हंसो मुच्येयमिति तंत्रकृत्। अन्नाहो हविर्भ्यां रस्मीनिवेति केशवः। अन्वाहार्यमा
साद्य। अन्वाधेयं दक्षिणां ददामि प्रजापतेर्भागोसी। ति मंत्रेण यथालिंगमूहेनाभिमंत्र्यर्त्वि
ग्भ्य उपबर्हणमग्नीन्ददामि अग्नीदिदं तदुपबर्हणमिति प्रस्थं वहिर्वेदि दद्युः यथावचनं मंत्रेणा
भिमंत्र्य ब्रह्मणे ददाति ब्रह्मन्नयं ते भद्र इति धेनुं स्त्रीलिंगेनाभिमंत्र्य होत्रे ददाति होतुरियं ते धे
नुरिति अनड्वाहमध्वर्यवे पुल्लिंगेन द्विवचनेनाभिमंत्र्य सर्वेभ्यो मिथुनौ गावौ दद्यादिति उपबर्हण
वदभिमंत्र्य वासः सर्वेभ्यो ददाति बहुवचनेन पुल्लिंगेनाभिमंत्र्य सर्वेभ्यः पंच गावो देयाः सोमा
य वासः रुद्राय गां वरुणाय अश्वं इति। प्रतिग्रहमंत्रः सर्वत्र प्रतिग्रहणे इत्येवं वा प्रतिग्रहः
गवादीनामभावे वासांसि मंथन्वौदना चैतावतो दद्यात्॥ एकां गां वा स्त्रीलिंगेन मंत्रेण। २९

भिमंत्र्य दद्यादिति केशवः। उद्धात्पक्षे ध्वर्यवे नड्वाहं दत्त्वा यथालिंगमभिमंत्र्यो ज्ञात्रे हिरण्यवा
ससी दद्यात्। हिरण्यं चात्र शतमानमिति तंत्रकृत्। मानः स्वरूपमाह कात्यायनः। यवार्धं त्रुटि
रित्युक्ता द्वे त्रुटी शलेकः स्मृतः। शलेकद्वितयं गुंजा द्वे गुंजे मानमुच्यत इति। सदस्येभ्यो धनं
दद्यात्सर्वे धनसंमितं। स्वभागाधसदस्येभ्यस्तेभ्यो दद्युस्तन्त्र ऋत्विजः। तत्समं यजमानो वात
स्मै तद्यात्स्वयं तथेति विकल्पः॥ ततश्चादित्यं चरुं चत्वारो महर्त्विजः प्राश्नीयुः। यथा देवन
मुन्निति वा चनं प्रणीतानां निनीय घृतप्रणीताग्निं नयेत्॥ समुद्रं त्वा प्रहिणोम्यक्षितं स्वां यो
निमपि गच्छत। अच्छिद्रः॰ महतमिति पुनरालंभवर्जं संतिष्ठते। यज्ञपार्श्वे। गर्भाधानादि सं
स्कारे ब्राह्मणान्भोजयेद् द्वरा॥ [illegible]नं विवाहसंस्कारे पंशोन्यो मेखलाविधौ। आवसथ्यं त्र
यस्त्रिंशश्चैनाधाने शतात्परं। अष्टकं भोजयेद्भक्त्या तत्र तत्संस्कार रसिद्धये इति। अनेकोपि प
क्षस्तु विस्तरभयान्नेहोच्यते॥ ॥अथ होत्रं॥ ॥ तत्र देवव्रतो यदि लिप्स्यस्तनुयु

३० रितिसूत्रमित्थंव्याचख्यौ। यदितुवक्ष्यमाणाइष्टयस्तनुयुर्विस्तिरेयुर्येदिवंनात्कनाकनाद्
ष्टयोध्वर्युणांतुशब्दः पूर्णाद्वित्यनव्यावृत्यर्थः। क्रियमाणास्विष्टुषुइष्ट्यंतमेवनपूर्णाद्वित्यं
तमितिद्वत्तिकारस्तुनित्यत्वमाह। पृथुपाजानऔधाय्येसर्वदेवतानामुपांशुत्वंगा
यत्रीहव्ययाग्नेरयमग्निःसहस्त्रिणः। सर्वासामिहयाज्यानांगायत्री। बार्हेयमेवेशिति।
कारिकाकारः॥ भुवोयज्ञस्येत्यग्न्याधेयाग्न आयूंषिपवसइति। अग्नेःपवमानस्य
सनःपावकदीदिवोऽग्नेपावकरोचिषेति। अग्नेःपावकस्याग्निःशुचिव्रततमःउदग्नेशुचय
स्तवइति अग्नेःशुचेःइंद्राग्न्योःप्रकृतिवत्। उतत्वामदितेमहिमहीमूषुमातरमितिअदि
त्याःप्रेद्धोअग्नइमोअग्नइतिस्विष्टकृतः यथादेवतंनिगमेषुदेवतानिर्देशः। एकैष्टिपक्षेत
तदानीमेवाश्वपदिकस्याःसर्गइतिबौधायनीयाः आश्वलायनवृत्तिकारस्तुहोमपूर्वाधा
नएवद्वादशाहाजस्रधारणं। नत्वग्न्याधेयेष्टिकालाद्वादशाहापूर्तौपवमानेष्ट्यनंतरमे

वाग्नीनामुत्सर्गइत्याह॥ अत्यंतंतुगतश्रियइतिसूत्रेदेवत्रातःशुश्रुवान्वेदत्रयमधीतवान्ब्रा
ह्मणग्रामणीःग्रामप्रधानभूतोवैश्यःराजराजसवान्राजन्यइतिगतश्रियमत्यंतधारणंआयुष्का
मस्याप्यत्यंतमजस्राइत्यन्येषामित्याह। आधानप्रभृत्यंतजस्रास्युरितिबौधायनोक्तपक्षेषु
तुसर्वाधानेषुनोत्सर्गः॥ ॥अथपुनराधानं॥ ॥तत्रतंत्रकदाहसर्वाग्निनाशेसमारूढारणी
नाशेऽग्नीनाधास्येविच्छिन्नसंधानार्थमितिसंकल्प्यकृत्विग्वरणादिगोपितृयज्ञवर्जमिवि
कृतमग्न्याधेयंकुर्यादिति। तत्रवार्धाधानिनोपासनाग्नेरर्धपृथक्कृत्यतत्रसर्वौषधिहोमादिकं
कार्यंसर्वाधानिनातुलौकिकाग्निंनिधायपुनस्त्वेतिसमिधमाधायतेनैवचतुर्गृहीतंकृत्वात
त्रकार्यंपुनराधेयब्रह्मोदनाग्निसिद्धिमित्यभिधायविच्छिन्नाधानेप्येवमेवमितिकेशवार्कः॥
बौधायनीयकल्पोक्तमग्न्याधेयमिमंरितं। अनंतेनद्विजप्रीत्यैयज्ञेशःप्रीयतांतया॥ ॥
॥इत्याधानं॥